ॐ यद्यसि वारुणी वरुणायत्वा राज्ञे परिक्रीणामि। इति गुड़कत्रयेण द्वितीयं क्रयणम् ॥ २ ॥ ॐ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण चतुर्थं क्रयणम् ॥४॥ ॐ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण पञ्चमं क्रयणम् ॥५॥ ॐ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गुड़कत्रयेण षष्ठं क्रयणम् ॥६॥ ॐ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा परिक्रीणामि'। इति गुड़कत्रयेण सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण हस्तादाहरेत्। प्रजापतिरृषिरोषध्यो देवता न्यग्रोधशुङ्गाच्छेदने विनियोगः। ॐ ओषधयः सुमनसो भूत्वा अस्यां वीर्य्यं समाधत्त इयं कर्म्म करिष्यति। ततस्तां तृणवेष्टितामन्तरीक्षेणानीय अन्तरीक्षे स्थापयेत्। ततः कृतशोभननाम्नोऽग्नेरुत्तरतः प्रक्षालितशिलायां ब्रह्मचारी गर्भवती वा श्रुतस्वाध्यायहीनो वा ब्राह्मणः प्राङ्मुख आचारतो नीहारजलेन अनाहतलोष्टेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमत उत्तराग्रेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्ब्बदिगानतमस्तकां कृत्वा तत्पृष्ठदेशे स्थितः पतिर्दक्षिणपाणेरङ्गुष्ठानामिकाभ्यां वस्त्रबद्धां पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासाविवरे शुङ्गारसं निःक्षिपति। प्रजापतिरृषिरनुष्टुप् छन्दोऽग्नीन्द्रवृहस्पतयो देवता न्यग्रोधशुङ्गारसस्य दाने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो वृहस्पतिः।
पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा तूष्णीं प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म कृत्वा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।” इति दशकर्म्मपद्धतौ भवदेवभट्टः ॥*॥ अथ पुंसवनोक्तवाराः। रविमङ्गलवृहस्पतयः। नक्षत्राणि। पूर्ब्बाषाढ़ोत्तराषाढ़ापूर्ब्बभाद्रपदुत्तरभाद्रपद्पुष्यपुनर्ब्बसुमूलार्द्रारेवतीहस्ताश्रवणामृगशिरसः। तिथयः। नन्दा भद्राः। लग्नानि। कुम्भसिंहधनुर्मीनमिथुनानि। क्रियाचन्द्रादिशुद्धौ दग्धयोगभद्रातिथिभद्राव्यतीपातवैधृत्यादीन् परित्यज्य गर्भधारणदिनावधितृतीयमासे कर्त्तव्यम्। इति ज्योतिषम् ॥ * ॥ स्त्रीकर्त्तव्यव्रतविशेषः। यथा,—

श्रीराजोवाच।

“व्रतं पुंसवनं ब्रह्मन्! भवता यदुदीरितम्।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥

श्रीशुक उवाच।

शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सार्व्वकामिकमादितः ॥
निशम्य मरुतां जन्म ब्राह्मणाननुमन्त्र्य च।
स्नात्वा शुक्लदती शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
अलं ते निरपेक्षाय पूर्णकाम! नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं कृपया भूत्या तेजसा महिमौजसा।
जुष्ट ईशगुणैः सर्ब्बैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि! महामाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥

ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्ब्बलिमुपहरामीति। अनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषणगन्धपुष्पधूपदीपोपहाराद्युपचारान् सुसमाहितोपाहरेत्।

हविःशेषञ्च जुहुयादनले द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।
श्रियं विष्णुञ्च वरदावाशिषां प्रभवावुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्ब्बसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दशवारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवान्तु विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्ब्बयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणव्यक्तिरियं देवी व्यञ्जको गुणभुग्भवान् ॥
त्वं हि सर्ब्बशरीर्य्यात्मा श्रीः शरीरेन्द्रियाशयः।
नामरूपे भगवती प्रत्ययस्त्वमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक! सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निःसार्य्योपहरणं दत्त्वाचमनमर्च्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्च्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमशीलः स्वयं पतिः ॥
बिभृयात् सर्ब्बकर्म्माणि पत्न्या उच्चावचानि च।
कृतमेकतरेणापि दम्पत्योरुभयोरपि ॥
पत्न्यां कुर्य्यादनर्हायां पतिरेतत् समाहितः।
विष्णोर्व्रतमिदं बिभ्रन्न विहन्यात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः स्रग्गन्धबलिमण्डनैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उद्वास्य देवं स्वे धाम्नि तन्निवेदितमग्रतः।
अद्यादात्मविशुद्ध्यर्थं सर्ब्बकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादशहायनम्।
नीत्वाथोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
श्वोभूतेऽप उपस्पृश्य कृष्णमभ्यर्च्च्य पूर्ब्बवत्।
पयःशृतेन जुहुयाच्चरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीः पतिः ॥
आशिषः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
  एतच्चरित्वा विधिवद्व्रतं विभो-
  रभीप्सितार्थं लभते पुमानिह।
  स्त्री चैतदास्थाय लभेत सौभगं
  श्रियं प्रजां जीवपतिं यशो गृहम् ॥
  कन्या च विन्देत समग्रलक्षणं
  पतिं त्ववीरा हतकिल्बिषाङ्गतिम्।
  मृतप्रजा जीवसुता धनेश्वरी
  सुदुर्भगा सुभगा रूपमग्र्यम् ॥
  विन्देद्विरूपा विरुजा विमुच्यते
  य आमयावीन्द्रियकल्यदेहम्।
  एतत् पठन्नभ्युदये च कर्म्म-
  ण्यनन्ततृप्तिः पितृदेवतानाम् ॥
  तुष्टाः प्रयच्छन्ति समस्तकामान्
  होमावसाने हुतभुक् श्रीर्हरिश्च।
  राजन्महन्मरुतां जन्मपुण्यं
  दितेर्व्रतञ्चाभिहितं महत्ते ॥”

इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतकथनं १६ अध्यायः ॥ (पुंवत् सूयते इति। कर्म्मणि ल्युट्। गर्भः। इति श्रीधरस्वामी ॥ यथा, भागवते। ५। २४। १५। “यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥”*॥ पुत्त्रोत्पादके, त्रि। यथा, भागवते। ६।६।२८। “पप्रच्छुः कस्य कर्म्मेदं पीतं पुंसवनं जलम्।” तथा च तत्रैव। ४। १३। ३७—३८।

“स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्।
अवघ्राय मुदा युक्तः प्रादात् पत्न्या उदारधीः ॥
सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युरादधे।
गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजाः ॥”)

पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषपिकपक्षी। पुमस्शब्देन कोकिलशब्दस्य कर्म्मधारयसमासे तस्यान्तलोपे पुंसः सन्निति मस्य सनि कृते मस्यानुस्वारे निष्पन्नः। इति मुग्धबोधव्याकरणम् ॥ (यथा, कुमारे। ३। ३२।

  “चूताङ्कुरास्वादकषायकण्ठः
  पुंस्कोकिलो यन्मधुरं चुकूज ॥”)

पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुमस्+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २६३ ॥ पुरुषत्वञ्च ॥ (यथा, मार्कण्डेये। ५०। १२।

“सौम्यासौम्यैस्तथा शान्तैः पुंस्त्वं स्त्रीत्वञ्च स प्रभुः।
बिभेद बहुधा देवः पुरुषैरसितैः सितैः ॥”)

पुंस्त्वविग्रहः, पुं, (पुंस्त्वस्य शुक्रस्येव विग्रहो यस्य।) भूर्ज्जम्। इति राजनिर्घण्टः ॥

पुक्कशः, पुं, (पुक् कुत्सितं कशति गच्छतीति। कश गतौ + अच्।) चण्डालः। इत्यमरः। २। १०। २० ॥ (यथा, मार्कण्डेये। १५। १८।

“अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः।
मत्स्यस्तु वायसः कूर्म्मः पुक्कशो जायते ततः ॥”

स तु निषादात् शूद्रायां जातो जातिविशेषः। यथा, मनुः। ४। ७९।

“न संवसेच्च पतितैर्नचाण्डालैर्न पुक्कशैः ॥”)